"समचतुरस्रो रुचको
वक्षोऽष्टाश्रिर्द्विवज्रको द्विगुणः ॥" )

रुच्, स्त्री, ( रुच्+क्विप् । पक्षे टाप् । ) दीप्तिः । शोभा । इच्छा । (यथा, महाभारते ।३।५।१३।
"तद्वै तस्मै न रुचामभ्युपैति
ततश्चाहं क्षममन्यन्न मन्ये ॥" )
शारिकाशुकवाक् । इति शब्दरत्नावली ॥

रुचिः, स्त्री, ( रुच्यते इति । रुच्+"इगुपधात् कित् ।" उणा० ४ । ११६ । इति इन् । सच कित् ।) अभिष्वङ्गः । अनुरागः । आसक्तिर्वा । स्पृहा । ( यथा, किराते । १० । ६२ ।
"रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिशुचौ पृथातनूजे ॥"
"अम्लो रुचिकरो हृद्यः प्रीणनो वह्निदीपनः ॥"
इति वैद्यकराजवल्लभे द्रव्यगुणव्याख्यायाम् ॥)
अभिलाषः । गभस्तिः । किरणः । इत्यमरभरतौ ॥ शोभा । इति मेदिनी ॥ ( यथा, रघुः । ५ । ६७ ।
"लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥")
बुभुक्षा । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥ आलिङ्गनविशेषः । तल्लक्षणं यथा । नायिकाया नायकस्य संमुखे जान्वोरुपर्य्युपविश्य वक्षसि वक्षो दत्त्वा यदवस्थानम् । इति कामशास्त्रम् ॥

रुचिः, पुं, ( रोचते शोभते इति । रुच्+इन् । सच कित् । ) प्रजापतिविशेषः । स च रौच्यमनुपिता । यथा,—
मार्कण्डेय उवाच ।
"रुचिः प्रजापतिः पूर्व्वं निर्म्ममो निरहङ्कृतिः ।
अत्रास्तमितशायी च चचार पृथिवीमिमाम् ॥
अनग्निमनिकेतन्तमेकाहावसथाश्रयम् ।
विमुक्तसङ्गं तं दृष्ट्वा प्रोचुः स्वपितरो मुनिम् ॥
पितर ऊचुः ।
वत्स कस्मात् त्वया पुण्यो न कृतो दारसंग्रहः ।
स्वर्गापवर्गहेतुत्वाद्बन्धस्तेनानिशं विना ॥
गृही समस्तदेवानां पितॄणाञ्च तथार्हणाम् ।
ऋषीणामतिथीनाञ्च कुर्व्वन् लोकाननुत्तमान् ॥
स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन् ।
विभजन्नन्नदानेन भूताद्यानतिथीनपि ॥
स त्वं दैवादृणाद्बन्धं बन्धमस्मदृणादपि ।
आवाप्नोषि मनुष्यर्षिभूतेभ्यश्च दिने दिने ॥
अनुत्पाद्य सुतान् देवानसन्तर्प्य पितॄंस्तथा ।
भूतादींश्च कथं मौढ्यात् सुगतिं गन्तुमिच्छसि ॥
रुचिरुवाच ।
परिग्रहोऽतिदुःखाय पापायाधोगतेस्तथा ।
भवत्यतो मया पूर्व्वं न कृतो दारसंग्रहः ॥
आत्मनः संयमो योऽयं दिवसं यदात्मा निष्परिग्रहैः ।
ममत्वपङ्कदिग्धोऽपि चिन्ताम्भोभिर्व्वरं हि तत् ॥"
इत्यादि ॥
पितर ऊचुः ।
"युक्तं प्रक्षालनं कर्त्तुमात्मनो नियतेन्द्रियैः ।
किन्तु लेपाय मार्गोऽयं यत्र त्वं पुत्र वर्त्तसे ॥"
इत्यादि ॥ * ॥
मार्कण्डेय उवाच ।
"स तेन पितृवाक्येन भृशमुद्विग्नमानसः ।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् ॥
कन्यामलभमानोऽसौ पितृवाक्याग्निदीपितः ।
चिन्तामवाप महतीमतीवोद्विग्नमानसः ॥
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ।
क्षिप्रं भवेत् पितॄणां यो ममाभ्युदयकारकः ॥
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः ।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवम् ॥
ततो वर्षशतं दिव्यं तपस्तेपे स वैधसम् ।
दिदृक्षुः सुचिरं कालं रुचिर्नियममास्थितः ॥
ततः सन्दर्शयामास ब्रह्मा लोकपितामहः ।
उवाच च प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितम् ॥
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम् ।
पितॄणां वचनात्तेन यत् कर्त्तुमभिवाञ्छितम् ॥
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छितम् ।
प्रजापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ॥
सृष्ट्वा प्रजाः सुतान् विप्र समुत्पाद्य क्रियास्तथा ।
कृत्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ॥
स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् ।
कामञ्चेममभिध्याय क्रियतां पितृपूजनम् ॥
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् ।
पत्नीं सुतांश्च सन्तुष्टाः किं न दद्युः पितामहाः ॥
मार्कण्डेय उवाच ।
इत्यृषिर्व्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।
नद्या विविक्ते पुलिने चकार पितृतर्पणम् ॥
तुष्टाव च पितॄन् विप्रः स्तवैरेभिरथादृतः ।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मको रुचिः ॥"
रुचिकृतपितृस्तोत्रं यथा,—
रुचिरुवाच ।
"नमस्येऽहं पितॄन् भक्त्या ये वसन्त्यधिदेवतम् ।
देवैरपि हि तर्प्यन्ते ये श्राद्धेषु स्वधोत्तरैः ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैर्दिवि ।
तन्मयत्वेन वाञ्छद्भिर्ऋद्धिमात्यन्तिकीं पराम् ॥
नमस्येऽहं पितॄन् मर्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकपुष्टिप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्द्धूतकल्मषैः ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतधारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ।
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान् ।
कव्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान् ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्म्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे ये शूद्रैरपि भक्तितः ।
सन्तर्प्यन्ते जगत्यस्मिन् नाम्ना ख्याताः सुकालिनः ॥
नमस्येऽहं पितॄन् श्राद्धे पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहारास्त्यक्तदम्भमदैः सदा ॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्विविधैर्नागैः कामानभीप्सुभिः ॥
नमस्येऽहं पितॄन् श्राद्धे सर्पैः सन्तर्पितान् सदा ।
तत्रैव विविधैर्मन्त्रैर्भोगसम्पत्समन्वितैः ॥
पितॄन्नमस्ये निवसन्ति साक्षाद्
ये देवलोकेऽथ महीतले वा ।
तथान्तरीक्षे च सुरादिपूज्या-
स्ते संप्रतीच्छन्तु मयोपनीतम् ॥
पितॄन्नमस्ये परमार्थभूता
ये वै विमाने निवसन्त्यमूर्त्ताः ।
यजन्ति यानस्तमला मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥
तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
वस्वात्मजान् पशुमवलां गृहाणि ॥
सूर्य्यस्य ये रश्मिषु चन्द्रबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमतो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ॥
ये खड्गमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दिव्यमहोरगैश्च ।
कालेन शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव येषाममरार्च्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धादिभोज्येषु मयाहृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।